ईत, इ बन्धे। इ ईन्त्यते। इति दुर्गादासः॥ (भ्वादिं-परं-सकं-सेट्। तेन इन्ततीति केचित्।)

ईतिः, स्त्री, (ईयतेऽनया। ई+क्तिन्।) डिम्बः। प्रवासः। इत्यमरो मेदिनी च॥ कृषेः षट्प्रकारोपद्रवविशेषः। यथा,—
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः"॥
इति स्मृतिः॥ (कलहभेदः। नृपतिरहितयुद्धम्।
"ईतयो व्याधयस्तन्द्रा दोषा क्रोधादयस्तथा।
उपद्रवाश्च वर्त्तन्ते व्याधयः क्षुद्भयं तथा"॥
इति महाभारते हनूमद्भीमसंवादे।३।१४९।३४।)

ईदृक्, [श्] त्रि, (इदम्+दृश्+क्विप्।) अयमिव दृश्यते। इति व्याकरणम्॥ इहार न्याय एइप्रकार इत्यादि भाषा।
("एतानीदृंशि भूयांसि न भवन्त्येव भूतले"।
इति कथासरित्सागरे। २५। १७६॥ तथा च किराते। २। २८॥
"इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः"।

ईदृक्षः, त्रि, (अयमिव दृश्यतेऽसावित्याद्यर्थे। इदम्+दृश्+क्स दृक्षे चेति ईश्।) ईदृशः। इति व्याकरणम्॥
("ईदृक्षराजकर्म्माणि भवेयुस्तदिदं वयम्"।
इति कथासरित्सागरे।)

ईदृशः, त्रि, (अयमिव दृश्यतेऽसौ इदम्+दृश्+कञ्।) ईदृक्। एतत्सदृशः। इति व्याकरणम्॥
("ईदृशानां विपाकोऽपि जायते परमाद्भुतः"।
इति उत्तररामचरिते।)

ईर, कि गतौ। प्रेरणे। इति कविकल्पद्रुमः। (वा, चुरां-परं-सकं-सेट्।) नुदि। कि ईरयति ईरति। नुदि प्रेरणे। इति दुर्गादासः॥

ईर, ङ ल, कम्पे। गतौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं कम्पार्थे, अकं-सेट्।) दीर्घादिः। ङ ल ईर्त्ते लता वायुना। इति दुर्गादासः॥

ईरिका, स्त्री, वृक्षविशेषः। यथा। ईरिकावणम्। इति णत्वप्रकरणे दुर्गादासः॥

ईरिणं, त्रि, (ऋ+इरन्।) शून्यं। ऊषरभूमिः। इति मेदिनी॥ (यथा, मनुः। ३। १४२॥
"यथेरिणे वीजमुप्त्वा न वप्ता लभते फलम्॥
तथानृचे हविर्दत्त्वा न दाता लभते फलम्"॥
"ततस्तदीरिणं जातं समुद्रस्यावसर्पितः"।
इति महाभारते अनुशासनपर्व्वणि। चलनं।)

ईरितं, त्रि, (ईर+क्त।) क्षिप्तम्। इत्यमरः॥ प्रेरितम्। कम्पितम्। गतम्। कथितम्॥ ("इतीरिते वचसि वचस्विनामुना"। इति माघे १७।१।
"तस्य वर्म्म विभिद्याशु स बाणो मत्सुतेरितः"।
इति, महाभारते।)

ईर्क्ष्यं, ईर्क्ष्ये। (भ्वादिं-परं-अकं-सेट्।) पराभ्युदयासहिष्णुतायामिति यावत्। इति कविकल्पद्रुमः॥ दीर्घादिः। रेफयुक्तः। ईर्क्षा परादोषासहिष्णुत्वमिति केचित्। ईर्क्ष्यति खलः साधवे। षड्दान्त इत्येके। इति दुर्गादासः॥

ईर्म्मं, क्ली, (ईर+बाहुलकात् मक्।) व्रणः। इत्यमरः॥ (यथा, भट्टिकाव्ये। ४। ४४।
"मृगयमिव मृगोऽथ दक्षिणेर्म्मा"।)

ईर्य्या, स्त्री, (ईर+ण्यत्।) भिक्षुव्रतम्। इति जटाधरः॥

ईर्व्वारुः, पुं, स्त्री, (ईरं वृणोतीति। ईर्+वृ-बाहुलकात् उण्।) ककुटिः। इति शब्दरत्नावली॥ फटी इति भाषा।

ईर्षा, स्त्री, (ईर्ष्यणं। ईर्ष्य+घञ्। हलश्चेति लोप इति यकारलोपः।) अक्षमा। इति शब्दमाला॥
("कथमीर्षां न कुरुषे सुग्रीवस्य समीपतः"।)
इति रामायणे॥ ४। २४। ३७।)

ईर्षालुः, त्रि, (ईर्षा+आलुच्।) ईर्षाविशिष्टः। इति हलायुधः॥

ईर्ष्यं, ईर्षे। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-अकं-सेट्।) दीर्घादिः। रेफयुक्तः। ईर्षे इति ईर्ष्यस्य घञि हलश्चेति लोप इति यलोपे सिद्धम्। ईर्षा पराभ्युदयासहिष्णुत्वम्। परदोषासहिष्णुत्वमिति केचित्। ईर्ष्यति खलः साधवे। षड्दान्तः इत्येके। इति दुर्गादासः॥

ईर्ष्या, स्त्री, (ईर्ष्यणं। ईर्ष्य+अच्+टाप्।) परोत्कर्षासहिष्णुता। रीष इति भाषा। तत्पर्य्यायः॥ अक्षान्तिः २। इत्यमरः॥ (यथा,मनुः। ७। ४८॥
("पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गुणाष्टकः"।
स्त्रियः पत्युरन्यप्रियासङ्गदर्शनादिजनितो मानभेदः। यथा, शृङ्गारशतके॥
"वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः"।)

ईर्ष्यालुः, त्रि, (ईर्ष्यां लाति। ईर्ष्या+ला+डु।) ईर्षाविशिष्टः। अक्षान्तियुक्तः। तत्पर्य्यायः। कुहनः२ इति हेमचन्द्रः॥ (यथा, राजतरङ्गिणी।
"दिवसे सन्निधानेन पैशुनप्रेरणा यदि।
ईर्ष्यालुना स्वैरिणीव रक्षितुं यदि पार्य्यते"॥)

ईलिः, स्त्री, (ईर्य्यते इति। ईर+इन् रस्य लः।) क्षुद्रगदाकारहस्तदण्डः। इति भरतः॥ सोँटा इति ख्याता। करच्छुरीति ख्याते एकधारा इति ख्याते यवनास्त्रे वा। इति सारसुन्दरी॥

ईलिका, स्त्री, (ईलिरेव। ईलि+स्वार्थे कन् टाप्।) क्षुद्रगदाकारहस्तदण्डः। इति भरतः॥ सोँटा इति ख्याता। एकधारेलीति स्वामी। तत्पर्य्यायः। ईलिः २ ईली ३ करपाली ४ गुप्तिका ५ करपालिका ६। इति शब्दरत्नावली॥

ईलितः, त्रि, (ईड़+क्त। ड़स्य लः।) स्तुतः। इत्यमरः॥

ईली, स्त्री, (ईर+क। कृदिकारादिति पाक्षिको ङीष्।) क्षुद्रगदाकारहस्तदण्डः। तत्पर्य्यायः। करपालिका २। इत्यमरः॥

ईश. ङ, ल, ऐश्वर्य्ये। इति कविकल्पद्रुमः॥ (अदां-आत्मं अकं-सेट्।) दीर्घादिः। ऐश्वर्य्यमीश्वरीभावोऽधीनीकरणञ्च। ङ ल ईष्टे धनी। मायानामीशिषेण च। अत्र कर्म्मणि षष्ठी। इति दुर्गादासः॥

ईशं, त्रि, (ईष्टे इति। ईश्+क।) ईश्वरं। (यथा कुमारे २।९ "जगदीशो निरीश्वरः"।) प्रभुः। इति मेदिनीकरहेमचन्द्रौ॥ (यथा, कुमारे। ३।३४ "कथञ्चिदीशा मनसां बभूवुः"।)

ईशः, पुं, (ईष्टे इति। ईश+क।) महादेवः।
("शनैः कृतप्राणविमुक्तिरीशः
पर्य्यङ्कबन्धं निविड़ं बिभेद"।
इति कुमारे ३।५९।) ईशानकोणाधिपतिः। इत्यमरः॥

ईशसखः, पुं, (ईशस्य सखा बन्धुः राजाहःसखिभ्यः टच्।) कुवेरः। इति हेमचन्द्रः॥

ईशा, स्त्री, (ईश+अ+टाप्।) लाङ्गलदण्डः। इत्यमरटीका शब्दरत्नावली च॥ (यथा महाभारते वनपर्व्वणि घोषयात्रापर्व्वणि २४०। ३०।
"ईशामन्ये हयानन्ये सूतमन्ये न्यपातयन्"।)
(ईशस्य महादेवस्य पत्नी। दुर्गा॥ ईशस्य प्रभोः पत्नी इति व्युत्पत्त्या स्वामिपत्नी। प्रभुस्त्री यथा, अथर्व्ववेदे ११।८।१७ "ईशा वशस्य या जाया"।)

ईशादण्डः, पुं, (ईशायाः लाङ्गलस्य दण्डः।) अक्षयुगयोः सन्धारणार्थो दण्डः। यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम"॥
इति विष्णुपुराणे २ अंशे ८। २॥

ईशादन्तः, पुं, (ईशेव दन्तो यस्य।) दीर्घदन्तहस्ती। तत्पर्य्यायः। महादन्तः २। इति त्रिकाण्डशेषः॥ हस्तिदन्तः। इति शब्दरत्नावली॥

ईशानं, क्ली, (ईश+आनश्।) ज्योतिः। इति मेदिनी॥ (तद्विशिष्टे, त्रि। यथा, ऋग्वेदे।१।१७५।४।
"मुषाय सूर्य्यं कवे चक्रमीशान ओजसा"।)

ईशानः, पुं, (ईष्टे। ईश्+ताच्छिल्यवयोवचनशक्तिषु चानश्।) महादेवः। इत्यमरः॥
("तस्मिन् मुहूर्त्ते पुरसुन्दरीणामीशानसंदर्शनलालसानाम्"॥
इति कुमारे ७।५६।
"तत्रेशानं समभ्यर्च्य त्रिरात्रोपोषितो नरः"।
इति भारते।) एकादशरुद्रान्तर्गतरुद्रविशेषः। इति पुराणं॥ (यथा, आश्वलायनगृह्यसूत्रे। ४। ९।
"हराय मृड़ाय शर्व्वाय शिवाय भवाय महादेवाय उग्राय भीमाय पशुपतये रुद्राय शङ्करायेशानाय स्वाहा" इति। दूतमूर्त्तिधरः शिवः। स च धूम्रजटिलः। यथा, मार्कण्डेये। ८८। २३।
"सा चाह धूम्रजटिलमीशानमपराजिता।
दूतत्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः"।)
शिवाष्टमूर्त्त्यन्तर्गतसूर्य्यमूर्त्तिः। इति स्मृतिरागमश्च॥ (परमेश्वरः। यथा, कृष्णयजुर्व्वेदे।
"सर्व्वेन्द्रियगुणावासं सर्व्वेन्द्रियविवर्जितम्।
सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं वृहत्"।
तथा च महाभारते १। १। २२।
"आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम्।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम्"॥
साध्यापुत्रो देवताभेदः। यथा,—
"धर्म्मात्मसुतसम्भूतः कामः साध्या साध्यान् व्यजायत।
प्रसनं च्यवनञ्चैव ईशानं सुरभिं तथा"॥